CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 632

Title Praudha manorama

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 632 Subject: Grammar

Title: Praudha manoramā

Author: Bhaltoji Dixit. Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 10.6" by 4" Extent: 26 foll.

Language: Sanskrit. Script: Devanagari

Remarks: —

॥ अथ वैदिकशब्देषु विशेषमाह ॥ षष्ठीयुक्त इति । छन्दसीति । कस्मिंस्तु रचीति कस्मिन्नेतस्य वृषन्नु शब्दस्य भक्तमुपसंख्यायते । नलुक्तं तु
नलोपस्याभावे णत्वं वा । लोके तु वृषवसुः । वृषाश्वौ उभयसंज्ञानि । मित्रयस्मयादिषु ऋकृते साद्यः समुदाया एव बोध्याः । तेन जश्त्वमस्तु
कुत्वं मा भूत् दिवि विपरीतं न प्रसज्यत इति बोध्यं । तेन भिन्नि । वाचा भिन्नाः प्रभवः । तेन पि । एनं विद्वांसं नहि त्वेति । विवदितुं न गच्छति इत्यर्थः ।
न प्राग्धातोः । नेगत्युपसर्गसंज्ञा धातोः प्रागेव प्रयोक्तव्या इति प्रयोगो नियम्यते । अस्यापवादश्छन्दसीत्यादि सूत्रद्वयं । इह संज्ञा नियम
पक्षो ऽपि भाष्ये स्थितः । तथा हि । तेइत्यनेन प्रादीनुपनिषत्संज्ञान्त्व रूपेण पराम्रश्य धातोः प्राक् प्रयुक्तानामेवैषां संज्ञेति व्याख्येयं । ए
वं च छन्दसीत्यादि सूत्रद्वयं न कर्तव्यं । न चैवं लोके ऽपि यथेष्टं प्रयोगापत्तिः । क्वचिदिष्टापत्तेः । तथा च माघः । वारुणीमदविशंकमथावि
ष्कृतरूपो ऽभवदसावविवशाग इति । भवभिप्रेत्यादिना तु नोपादनीयं । अनभिधानात् । तत्र स्य प्रयोगनियमार्थत्वे ऽपि घेवेटश्चपद इत्या
दीनामनभिधानेनैव वारणीयत्वात् । एवं च कर्तृकर्मणोः श्वेति सूत्रे साधेनभूयत इति वृत्तिग्रंथो ऽप्यस्मिन्पक्षे संगच्छत इति दिक् ॥ ॥
इति प्रथमोध्यायः ॥ ॥ यवाग्वा स्वमिति । नच यवाग्वग्निहोत्रशब्दयोः भिन्नविभक्त्यवरुद्धतया तदर्थयोरभेदान्वयो न संभवतीति वाच्यं । वि
भक्त्यो भेदे ऽपि कर्मार्थकतायाः अविशेषेण विरुद्धार्थकत्वाभावात् । अभेदमात्रस्य किंचित्करत्वादिति भावः । यद्यपि गत्यर्थकर्मणि द्वितीया

चतुर्थ्यै शिवः। कर्मत्वेसादीनामुदाहरणेषु विभक्तिविकल्पेपि विशेषणविशेष्ययोरेकविभक्तिकत्वनियमो लोके दृष्टस्तथापि वेदे
नास्तीति ध्येयं। अभ्याकरास्कत्नीयावहोरिति सूत्रेण करणे द्वितीया विधीयत इत्याहुः। न च नसूत्राक्षरानुगुणं नवा भाष्याद्यनुगुण
मित्यपेक्ष्यं। हनु निशायत इति। हं निशेन इत्यर्थः। त्राध्वं त्रायध्वं। दानिद्दानि। विवष्टि वष्टि। इहस्त्रमोनेन वक्ष्यमाणेन बहुलं छंदसीति
सूत्रेणाभ्यासस्येकारो बोध्यः। मंत्रेघस। ह्वको टिल्ये। अस्य ह्वकनुगुणस्यानुकरणं ह्वरेति। अकारस्तूच्चारणार्थः। अजनेति। अजनि
षमेत्यर्थः। तूरेयब्राह्मणो हरिश्चंद्र इति वरुणस्येदं वचनं। विभाषेति। एतेन इहसूत्रे सिच इत्यनुवर्त्य सिचस्थाने लिङ्गो ... लिशिति व्याख्याना
न लिङ् लिटो नेति हरदत्तग्रंथः परास्तः। लोपस्यवैकल्पिकतया छंदसि च रूपांतरस्यानापाद्यतेया सिजनुवृत्तेर्वैफल्यात्॥ ॥ द्वितीयो ध्यायः॥
आद्येषु चतुर्ष्विति। तत्रापि सहिजनिरभिभ्यो णिजंतेभ्य आम्। चिनोतेरक्सुहादिति बोध्यं। लोक इति। वेदेपि पाक्षिकमिदं बोध्यं। विदांकु
र्वन्त्विति पूर्ववत्सूत्रस्यादन्यतरस्यां ग्रहणस्येहानुवृत्तेः। पापृथामिति। पवतेः पुनातेर्वा ण्यंतात् शीलिङि आम्। क्रियादित्यनुप्रयोगः। विदा
मक्रन्निति। विदेर्लुङ्याम्गुणाभावः। लुङ्नकरोतेरनुप्रयोगः। मंत्रे घसेति लेर्लुक्। अंहीनः। अकरिति धातुके तु नित्ये सार्वधातुके गुणे हल्ङ्या राम
द्यादिलोप इति विशेषः। तुपेः। आयप्रत्ययाभावश्छंदस्येवेदा। सूत्रे केवलस्योच्चारणात्। अगोसमिति। अदित्ता दिउ भावे वदव्रजेति वृद्धिः

अलोझलीति सिचो लोपः। इट्पक्षे तु अगोपिष्टं। आयप्रत्ययपक्षे अगोपायिष्टं। औ इत्थं चतारि छंदसि भाषायां च ऊनं वर्जयिता
त्री एप्येवेति विवेकः। त्वा यतस्त्वामिच्छतः जरितुस्त्वा तुर्ममि काममभिलाषं मा ऊनयीः। ऊनं मा कार्षीरित्यर्थः। मा ऊनं न इति भाषायां। ऊ
नपरिहाणे चुरादावदंतः। धनदाहे। चुरादिरदंतः घटादिर्नानिष्ठ। भाषायां तु अदधनत्। घटादेरदिधनत्। इलप्रेरणे चुरादिः। ऐलयीत्। भा
षायां तु ऐलिलत्। अर्द गतौ याचने च। अर्द हिंसायां हेतुमण्णिच्। आर्दियत्। भाषायां तार्दिदत्। यत्र प्रायानो नयनीति सूत्रं लौकिकेपि संचा
रयता हयमपि लौक इत्युक्तं। नन्वाछंदसीत्यस्यानुवृत्तेः काशिकादि महाग्रंथसम्मतत्वात् वैयाय्यात्तदनन्तु हृत्वो तु वद्रो दुर्लभता। यत्तु वि
भाषा धेट्श्व्योरिति विभाषाग्रहणमिहानुवर्तते न तु छंदसीति न दाशाय पर्णिनं। नदपि न। सूत्रे नञो वैयर्थ्यापत्तेरित्याहुस्तान्तावत्। अमर
इति। व्यत्ययेन परस्मैपदं। यस्त्रानोषिति। यत्तु इमामंत्रव्याचक्षाणेः पूत्क्रे रूहेर्लिङि वा पि संज्ञा हर्षको विघ्निरनित्य इति लघूपधगुणो न रार
नीति तत्रैव दिवादमात्रं। लोके तु अकार्षीत्। अमृत। अदारीत्। अरुक्षत्। छंदसि निष्ठ। कृपिमासे इति। ऋदुपधास्येति सूत्रेणेतिभावः। अश
णिवेदेति। न च यस्य दीर्घो निपात्यतामिति वाच्यं। यतो नाव इत्याद्युदात्तापत्तेरिति भावः। अत्र श्लोकवार्तिकं। निष्टर्क्यव्यत्ययं विद्यात् निस
षत्वं निपातनात्। ण्यादायादेश इत्येतौ। उपचाय्ये निपातितौ। एयदेकस्मात् चतुर्भ्यः क्यप् चतुर्भ्यश्च यतो विधिः। एयदेकस्माद्दशभ्यः क्यप्

एयद्विधिश्च तुः। वस्य यमिति आद्येन विपर्यासमित्यर्थः। चतुर्भ्य इति देवहव्यादिषु चतुर्षु चतुर्भ्यो धातुभ्यः क्यप्। उपसर्गभेदान्नयनेभे-
दः। द्वौ क्यपाविति। द्वाभ्यां धातुभ्यां द्वाविति भावः। चतुरिति सुजंतं। चतुरो वारानित्य द्वितीयतन इत्यर्थः। छंदसि। वनषणसंभक्तौ इति
भ्वादिगणे सहनिर्दिष्टो ग्रहणेन तु वृतु यावने षणु दाने इति तनादिको। धातुबंधकेत्वात्सहपठितयोरेव ग्रहणमस्य न्यायत्वाच्च। ब्रह्म-
वनिमिति। ब्रह्मवनमिति। क्षत्रवनमिति। गोसननमिति विग्रहः। सुषामादित्वात्सत्वं। हव्येन। हव्यशब्दे उपपदे वहेः क्युन्स्यात्स्यादौ नेति। जनसन। जे-
न जनने जननी प्रादुर्भावे ह्योरपि ग्रहणं। षणु दाने षण संभक्तौ। द्वयोरपि ग्रहणमित्याहुः। अत्र व्याख्यानं शरणं। मंत्रे श्वेत। श्वेतादिष्व-
र्वेभ्यो वहादिभ्यो णिन्स्यात्। अलाक्षणिकं कार्यार्थं निपातनं। श्वेतशब्दे कर्तृवाचिन्युपपदे वहेः कर्मणि प्रत्ययः। उक्थ्ये कर्मणि करणे वा
उपपदे शंसतेः प्रत्ययः नलोपश्च। दाशृ दाने अस्य पुरस्पूर्वस्यादेरुत्वं कर्मणि च प्रत्ययः। अवयाः श्वे। चकारादुक्थशासः। एतच्च पाक्षिकं। न
थाचैके यदादयः। उक्थशा इत्यपि संबुध्यर्थं निपातनं कर्तव्यं यदि मंत्रे दर्शनमस्तीति। अररिवानिति। राहाने लिटः क्वसुः। वस्वेकाजाद्घसामिति [redacted]
नीट्। आदंतत्वात्। नञ्सुभ्यामिति अव्ययपूर्वपदप्रकृतिस्वरः। दीर्घादटीति नकारस्य रुत्वं। आतोऽटि नित्यमिति रोः पूर्वस्याकारो नित्यमनुनासिकः। भ राम
विषये तु वसोः संप्रसारणे कृते वत्वाद्यभावादि उभावः। एतेन मानः शंसो अररुषः इत्यादि व्याख्यानं। प्रसंगात् घधातु शब्दं साधयितुमाह

पवादः। सोममर्हति यः। कथं तर्हि प्रीतास्मि ते सौम्येति रघुः छंदोधिकारात्। उच्यते। सोम इव सौम्यः। शाखादित्वाद्यः। तत्र साधुरिति यद्वा।
सौम्य इत्यादि द्विधा वे स्वार्थे ष्यञ्। मये च। आगत विकारावयव प्रकृता मयडर्थाः। यथायोग्यं पंचमी षष्ठी प्रथमाः समर्थविभक्तयः। शिवं
भावायेति तु शोना तिप्रष्टमीनां प्रयोगश्चिंत्य इत्याहुः॥ इति चतुर्थः॥ त्वावत इति। त्वमिव त्वावान्। तस्य प्रत्ययोत्तरपदयोश्चेति त्वादेशः। आ
सर्वनाम्न इत्यात्वं। एतेन मावत इति व्याख्यानं। सादन्यमिति। अन्येषामपीति दीर्घः। छंदसि घस। सकारः सिन्निवेनिषदत्वार्थः। तेन भत्वाभा
वाद्दोर्गुणेन। नं चैवं पक्षे इको सवर्णे इति शाकलापत्तिः। छंदसि हरस्येवानुविधेयत्वात्। वार्तिककृता सिन्नित्यसमासयोर्नेति निषेधा
च्च। उपसर्गाः। इह धातुशब्देन धातुवाच्या क्रिया लक्ष्यते। सा अर्थः प्रयोजनं यस्य साधनस्य तस्मिन्नित्यर्थः। न दाह धात्वर्थविशिष्ट इति। छंद
सि प। पर्यवस्थातृ शब्दात्स्वार्थे इनि प्रत्ययः। अवस्थातृ शब्दस्य पंथपर इत्यादेशो च निपात्येते। अशावीति। अशो छंदत्। आई दंष्टा। [redacted] रिष्व
इति तु रिष्टमेयः स्विनिलोपः॥ इति पंचमः। स्पाईद्विति। स्पर्द्ध संघर्षे द्विर्वचन अकारलोपः रेफस्य संप्रसारणं च निपात्येते। अस्यर्द्धे थामि
ति भाषायां प्रकृत्यांतः। अयं पाठः पाष्ठभाष्यानुगुणः। शाकलसूत्रे ह्रस्वश्चेति चकारेण प्रकृत्येत्यनुकृष्यत इति भाष्यदर्शनात्। इको गुण
वृद्धी तिर्द्दिसूत्रे तु नांतः पाद मिति पाक्पुरस्कृतः अयम पि पाष्ठभाष्ये स्पष्टः। अस्मिंश्च पक्षे एउः पदांतादतीति पूर्वरूपनिषिध्यते। तेस्मिंश्च नि

षिद्धे एवोयवायावइत्यपि न भवति। बाधके निषिद्धे बाध्यमपि कृचित्रेनिरसीकारांतः। पादश्चेहन श्लोकस्य। वाँ छसीत्यतो मंडूकप्लुत्याछंद
सीत्यस्यानुवृत्तेः। न ह्यह ऋक्पादेति। एङः पदांतादति। स्रत्रांतः एङ इति पंचम्यंतमनुवृत्तं प्रथमया विपरिणम्यत इत्याह एङः प्रकृत्येति। अंत
पादं किमिति। ऋचीत्येव क्विन्नोऽक्रमिति प्रश्नः। एतेन चैतनीत्यत्र शर्वपादस्यांते एङ् अकारश्च परपादस्यादौ। अंतो निमित्तं निमित्तिनोः पादमध्य
स्थत्वं नास्ति। अव्यात्। अवरक्षणे आशीर्लिङ्। अवद्यादिति यंवम्यंते। अवक्रमुरिति। अवपूर्वस्य क्रमेर्लिट्। उसि छंदसि वेति द्वित्वाभावः। क्रमि
तु अव च क्रमुरिति पठ्यते। नदसुक्तं। लक्ष्यविरोधात्। अवंतेति। कृइः वृत्रो मंत्रे घस इति च्लेर्लुकि दृश्यस्य अरादेशो यणा। अवस्यवेइति अवेर
सुन्। ननु क्यच्। क्यास्छंदसीत्युः। स्य छंदसि। स्यः प्रथमो नस्यानुकरणं। दस्तानां कथं न हि। महिश्चेत्रभुरथ्यं इति विहान। इन्द्रं इमव से
च र्षतिप्रांग अधिशब्दे हस्त्वभुइति। नह्यो त स्यचमक्तिउदात्तइय पदर्शनात्। एपदकारेविभज्ये वपागच्छ। सत्यं बाहुलकात्समाधेयं। प्राति
शाख्येतु विशिष्य विहितं। पुरुष्टस्थ घिशर्वेषुशाकारउपजायतेऽन्हस्वे च स्वर्वपधांते चंड्रशब्दे परेतराइति। अंतरेति। मध्य इत्यर्थः। तथा चाम
कः शाकार इति भाष्यः। पाणिनीयेतु दिता छिंगा शाग मएव। स च चंद्रशब्दस्य उभयनिर्देशे पंचमीनिर्देशो बलीयानिति सिद्धांतात्। पितरा। पूर्वेण राम·
दस्य अराङादेशो निपात्यते। उत्तरपदेतु सुपां सुलुगित्यादिना विभक्तेरा कारादेशः। क्रुनो ङिः सर्वनोमस्थानयोरिति गुणः। सधमा। सधे इति

पदस्यांतेऽत्यर्थः २

६ त्येयेन यकः प्रसंगे शाक्यिपिस्त च चम्र भ नुपा यो गंधेया च क्ष लेमि दयध्वत्यत्रयकं न्वीह त्यय ६

२

दिति ङित्वाद्विर्त्विमिति भावः। न तु श्जिगुरिति द्विर्वचने चीनिरस्थानिवद्भावादादेशप्रतिषेधाद्दात्। म्य इत्यनयोद्वित्वं। न तु उत्तरदले
उत्वेपि अभ्यासे उरदत्वं निर्वाधं। नमुर्थापंचद शप्रत्यया विधीयंते। नत्रसेसेन्। असे असेन्। अध्यै। अध्यैन्। कध्यै कध्यैन्। शध्यै
शध्यैन्। एषां दशानां द्वयोर्द्वयो रूपाविशेषेपि स्वरे विशेषः। इतरेषु तुपंचसु रूपविशेषः स्पष्ट एव। वक्षे इति। वचः से। कुत्वं षत्वं। ए
षे इति। इणो गुणः। नित्वादाद्युदात्तः। प्रेषे इति। इणः क्से। कित्वाद् गुणे आद्गुणः। श्रियसे इति। इयङ्। नित्वादाद्युदात्तः। इह मंत्रे मध्यो इ
दात्तः पठ्यते तत्र बाहुलकात्प्रत्ययो स्वरो बोध्यः। मादयध्या इति। ण्यंतात् शध्ये। तस्य भाववा विसार्वधातुकत्वाद्गुणप्रसंगे व्यत्ययेन श
प्। गुणायादेशौ प्रत्ययस्वरः। पिबध्या इति। यक्। तस्य बहुलं छंदसीति लुगिति हरदत्तः। पूर्वविद्यं त्ययेन लुक्। च्छपूचेति स्वीकृतं तन्मो
रव ग्रस्ता। पञ्चकाशिकायां शध्ये शध्येन् पिबध्ये मादयध्ये इत्युदाहृतं अन्येश्च न देवानुस्तंतं न हुक्रमेण योजनीयं। अन्यथा लक्ष्य वि
संवादात्। स्तवइति। डित्वान्न गुणः। तदर्शमेमासिस्तवइति मंत्रे स्तवइति पदमाद्युदात्तं पठ्यते तत्र स्वरव्यत्ययः। यद्वा तवेन् प्रत्य
ये इति स्वरः। गुणाभावस्तु बाहुलकात्। यद्वा छंदस्युभयथेति सार्वधातुकत्वे सार्वधातुकमपिदिति ङित्वं बोध्यं। प्रंये। प्रपूर्वाद्यातेः कै
प्रत्ययः। रुहेरिष्यै। तन्त्रत्रपूर्वाद्धथेश्च। दृशे विख्ये च। योगविभागे फलं चिंत्यं। के प्रत्ययः। कित्वाद् दृशेर्न गुणः। ख्यातेरातो लोपः। विलिख

इति किलान्तगुणः। क्तानो सुन्कसुन इत्यव्ययता द्विभक्ते लुङ्। न लुम ते इति निषेधाद् तत्संनत्स्येत् इदीर्घेति। कृत्यार्थे भावकर्मणोरित्यर्थः।
यद्यपि भव्यगेयादिषु कर्त्रावह्यं करणे स्नानीयं चूर्णमित्यादौ करणे। दानीयो विप्र इत्यत्र संप्रदाने च कृत्यानामर्थस्तथापि कृत्यत्वेन
रूपेण न कर्त्रादिषु विधिरस्ति किं तु विशिष्येव। बाहुलकाद्। कृत्येनयानुभावकर्मणोरेव। तयोरेवेति सूत्रात्। अतः प्रतिपदोक्त
स्येव कृत्यार्थस्येह ग्रहणं न्याय्यं। नम्लेच्छितवै। न म्लेच्छितव्यमित्यर्थः। दिदृक्षेण्य इति। दृशेः सन्नन्तात् अतो लोपः। कर्त्तमिति। कृत्य कृत्यप्रत्यय इत्यर्थः
मित्यर्थः। [redacted] यच्चु कृञो विचिशुणे रपरत्वेन स्यभावइति त्वप्रत्यय इति व्याचक्षतेन त्रेरेफस्य विसर्गो दुर्वारः। आद्युदात्तं ना
त्वडुलमेति दिक्। अवचक्षेतु। एशप्रत्ययः। शिलाक्साविधानुकत्वानेनख्यानादेशो न। भावलक्षणे संस्कारादीनामवधित्वेन लक्षणत्वं
बोध्यं। आसमासे इति। संसृष्टो हि निष्ठतिः समासो रूढः। यदि हि सृष्टः खडहः संनिष्ठते इत्यादौ दर्शनात्। आतमितो इति। तमुण्ल्लानो। स्त
पितवः। स्तृ ह्लगतौ। उदृदिर् हिंसानादरयोः। विसृपइति। गमनादित्यर्थः। यत्तु व्याचख्युः। विसृपि तु आतर्दितु मित्यर्थ इति। तन्न। स्त
पेरनिट्त्वात्। भावलक्षणे इत्यनुवृत्तेश्च। अतएव यच्चते विदभिश्रिषः पुराजन्तुभ्य आतृदः। संधानात् संधिमथवा पुरस्त्वसु रिक्वर्त्ता वि राम
ढुतं पुनः। अयं मन्त्रो वेदभाष्ये इत्थं व्याख्यातः। यद् इद् अभिश्रिषः। अभिश्लेषणात्। संधानद्रव्यात्। कृते चित्। विनापि। जन्तुभ्यः या
वभ्यः। आतृदः आनर्दनात् रुधिरनिःसरणात्। पुरा सर्वमिव। संधिसंधातव्यं। संधाता संयोजयिता विद्रुतं विच्छिन्नं पुनरिस्क्रर्त्तानिष्क
र्त्ता संस्कर्त्तेति। तस्माद्यथोक्तमेव मनोरमं॥ ॥इति तृतीयः॥ उप्रत्यये तमिति। नेनक्किवंतात्तऊषु। स्वयंभूः। लिलस्वर इति। आनुगाकार
स्योदात्तत्वमित्यर्थः। यत्तु न्यासकृतोक्तं। मुद्गलानी द्वाह्ये द्वितीय उदात्त इति। नेहेद बाहुत्व प्रयुक्तमेव। लितीति प्रत्ययात् पूर्वस्य विधीयमा
नेस्वभिहितमानुकं विहाय द्वितीयेप्रवर्त्तन इत्यत्र बीजाभावात्। सकृत्त्वे द्विरुपाठविरोधाच्चेत्यास्तां तावत्। आविष्य इति। आविर्भूत इ
त्यर्थः। द्यावेश्चं। मयेदेतं यो भाषायामित्युक्ते वेदि अप्राप्तो विधीयते। नोतत। घ्य च इति प्राप्तः प्रतिषिध्यते। मोजमिति। औत्सर्गिको एवं
अवेमेति। वृधिवपिभ्यां रन्। ठण्ठं। सभाशाह्यात्सम्यना तटः स्यात्सर्ध्वर्थे। पाय्यसीति। पाय्योन रिक्षमिमिवत्विकाररः। पानिभूतान्यवकाशादा
४ नेनेति ब्युत्पत्तेः। यद्यपि पाने बलिं शुद्ध। उदके युद्ध अन्ने चेति। अन्नोदकयोः पांशुशाद्रो स्युत्पादितस्तथापि बाहुलकादंतरिक्षे पीतिभावः
वैशानीभ्य इति वैशानुः पल्वलं। विशोर्झेच्च। अयाघन। भेवच्छंदसीत्येवसिद्धे घ्यजादिनिवधिमा भूदिति। यद्विधीयते। अम्निय इति
घन्नूघनोरुदाहरणं। ध्वंतो दात्तमाद्युदात्तं वा। रक्षो यानूनां। षष्ठी वहुनीता भ्यां रक्षस्तशाद्ध्यानुशाद्राभ्यां हननकरणीभूता इत्यर्थेयत्
स्यात्। रक्षस्येति। रक्षसां हननी। एवं यानव्या। हविष्यमिति। हविषे हिता हविष्या। तस्याः प्रसंशेनमित्यर्थः। व्यस्येतिलोपेकृते हलो य
प्रौ२ वव२

मात्मिति पक्षे यलोपः। मायाधामण। पूर्वसूत्रापवादः। तद्धानासाम्। मतं तेन प्रकृतिकात्यथमांतादुपधान्तकरणीसूतमंत्रार्थकान्न इष्ट
कारूपे संबंधिनियतत्वात्तमतो श्लुक्। वर्चस्काविति। वर्चःशब्दोस्त्यस्मिन्नतः वर्चस्कावस्कच देवस्य तास विंतु रित्यादिक्। उपधीयते नेने
त्युपधानः। अथ कथं स्वस्थीस्त्वपदधानी प्राणभृत्तउपदधानीमित्यस्वस्थाः प्राणभृत्या इति हि प्राप्नोति। सत्यं। स्वस्थादिशब्दानां। तत्मंत्राप
धेयात्विशकास्वपचारात् प्रयोगः न तु तद्धितांतमिति न दिस्यवधेहि। पूर्वोत्तरमीमांसयोस्तु तद्धितपरतया प्रतीयमानात्रेयाः भंत्का
व्याख्येयाः। अश्विमानण। अश्विमच्छब्दाडुत्तेर्थेण्स्यान्नायनोपवादः। मतोर्लुक्। आश्विनीरिति। आश्विनशब्दवान् मंत्र उपधानोयासां
ताइत्यर्थः। मूर्द्धन्वतीरिति। अनो नुडिति नुडागमः। अत्रेदमवधेयं। सूत्रेवयस्यास्वित्यनुपपन्नं। तद्धानासोमिति यत्रास्य यस्य छंदस्य
वविहितत्वात्। एवं छंदोवत्सूत्राणीति भाष्यकारेष्टेरिदमेवज्ञापकं। अथवा सामान्यापेक्षं ज्ञापकं छांदसा अपि क्वचिद्भाषायां भवंती
ति। तेनोनुपस्थितपरिपंथिभिः पार्थिवैरित्यादि सिद्धं। यथासंख्यमिति। वृत्तिकारस्तु यत्ल्वचेति सूत्रे व्यभजत्। पूर्वैः कृतं। मत्वर्थ इति सि
द्वं। वा तद्वइति वृत्तिकाराः। यल्तु तुनानुवर्त्तते। एतदपि पूर्वत्रयोगविभागस्य फलमिति नेष्यामनंतायल्वेवावितिनाऽय्यमपिनुयल्यनुवर्त्त राम
तां। तथा त्वच्छ्रीणा इत्यपि रूपं बोध्यं। पृथ्व्यादि साधुदांतत्वे च। सहस्रेण। सम्मित इति पागंतरं। मनोच। तपःसहस्राभ्यां विनीनी इत्यस्या

छंदसीति। आत्मनः इति विशेषणाद्भाषितः। अघायुरिति। अश्वाघस्यादिति वस्य मा ऐना कारादेशः। जवसवादिति। कद्दोरपोप
वादः। न्वच राथेविधीयते। लिटो डादो। आगमोस्त्व इति। तौ च पर्यायेण न तु यौगपद्येन। अङ्घ्रिविसामर्थ्यात्। अन्यथा सवर्णदीर्घेणैव वि
शेषाभावात्। आडुत्तमस्येति स्वत्वान्मंडूकप्लुत्या विङ्केत्यनुवर्त्तत इत्याशयेनाह। नौ च पिता विति। तत्फलं तु यद्योग्या अश्ववेथे। विकंदसी
उर्वत्यसुब्रवैते इत्यादौ गुणः। शनौ तु पिद्ग्रहणं नानुवर्त्तितं। तत्र छंदस्युभयथेति सार्वधातुकत्वाद्विकरणः। आर्द्धधातुकत्वात् ङित्त्वाभा
वात्। विकरणस्य गुणः। अत एव कृक्त्विन्त। तनूरूचात रुचियत्स्वलैवेते। तारिषदिति। तिपि इकारलोपः। सिपद्ददृ। जोषिषदिति। जुषी प्रीतिसे
वनयोः। अनुदात्तेत्। व्यत्ययेन परस्मैपदं। करवोवेति। कृञो लेटो वस्। उः। गुणे रपर[illegible]वः। आट्। अडित्वाद्विकरणस्य गुणः। करोतेरुतामाव
श्चमादेपेतेइति। मदी हर्षग्लेपनयोः। लेट्। आकारस्येति। प्रथमस्येत्यर्थः। द्वितीयस्य तु टित आत्मनेपदानामित्येत्वमेव नित्यत्वात्। नवशाद्वं
तरथास्यो अनित्यत्वं। कृताकृतप्रसंगित्वमात्रेण कश्चिन्नित्यताश्रयणात्। उत्तरसूत्रे अन्यत्रेति लिंगाच्चेति। अन्यत्रं किमपेक्ष्येत्याकांक्षायां
पूर्वसूत्रविषयादिति लभ्यते सन्निधानात्तदाह आतइत्यादि। ईशेइति। ईश ऐश्वर्ये। उत्तमैकवचनमिट्। इतश्च लोपो नास्ति परस्मैपदेष्वि
त्यकः। टेरेत्वेतत्स्यं ऐ। गृह्यांता इति। गृहेः कर्मणि लिट्। आट्। यक्। संप्रसारणं। सोतः। पणबंध इति। यदिमे भवानिदं कुर्यात्तर्हीदमहंदास्यामीति

समयकरणं यण्बंधः। आशंकासंभावना अहमेवेति। त्रिपुरविजये देवैः प्रार्थितस्य रुद्रस्येदं वचनं। पशवः संसारिणः नेदिति। इच्छञ्च अ
शंकां द्योतयति। जित्वा चरन्तिन नरकपातः संभाव्यते। समाभूदित्यर्थः। हेविकरणं विति। न च शापृन्या प्यः। सिक्तवा कुलकान्। एतेन समर्थ
जिह्नाजो अस्मां अविशु। सेमामविड्ढी सा दिव्याख्यातं। अवरस्से णस्मा ल्लो दिबाकुलकान् सिपः प्रवृत्तेः। नरूपमेति। उपप्रत्ययोनस्य सिपं प्र
संगतात्सार्वधातुकार्द्धधातुकयोरिति गुणः। सिबंतस्य इपिल घूपघगुणश्च प्राप्तो वाकुलकान्न भवति। नसंनीतिप्राप्ते इति। यत्तु सुपां
उ सुलुगिति सूत्रे हरदत्तेनोक्तं तस्युवंती ति प्राप्त इति युक्तः पाठ इति। न श्विसे। श्व प्रत्ययस्यैव कल्पिकतयेह शपः सोप्यवे न बहुवचनमात्रे
व्यत्ययमिव्यं ल्कंतं स्वं तीतिभाष्यकाशिकारूदपाठस्यैव न्याय्यत्वात्। क्रत्वडीति। तेन दिव्यतीत्यादौ विधीयमानानां गणादीनां देवनादि
कर्तृत्वा वकृतादेवमुक्तं। नत्विहकारकशक्तिवैप्याग्रहः कृत्ववद्धितमात्रेनासर्वानां तथा च किमो विहितोऽतिर्यच्छब्दादपि भवति। तं वेत्य
यतिते जातवेदः। विश्वेदेवासो मनुषोयतिष्ठनं। आदृगमा। तां छीलिके युष्माख्यातमिदं विशेषाभिधित्सयाख्यायते। लिट्टुडावादिति।
असंयोगाल्लिट्किदिति किंत्वं सिद्धिमितिभावः। ननु सेसिधंसिप्रश्नमिभ्यः किंकिनोः संयोगात्परत्वेन कित्वं सार्थकमिति चेत्। नारदशालस राम
स्याकरे अनुदाहृतत्वात्। यद्दितु नारदशालस्येप्रमाणमस्तितर्हि किं दस्युभयथेति लिटः सार्वधातुकत्वस्यापिस्तत्वेन सार्वधातुकमपि

यङ्

भक्तिको निर्देशः। सहमाद्येतिदेवा अस्मिन्नितिसधमादो यज्ञः। मदोनुपसर्ग इत्यविप्राप्ते अजवृन्यास्त्रीखलनाइति नह्वा धके लुटि
हलश्चेति घञ्। तत्र मांदेत्यकारउच्चारणार्थः। तेन मादयते किं वंतस्य मादिति पदेपं नत्रापि भवति। आताइहं तोहरयो युञ्जानाअ
र्वाग् इन्द्रसधमादो वहंतु। सोद्येः। तनितनीयमिति। भृत्विचकेति मंत्रे हिंसाल्हेत्याद्युदात्तं पठ्यते। न ह्राष्यव शात्रूणमभिम्ववितेतिव्याख्यानं।
तच्चितं नोदात्तं स्यात्। क्तप्रत्ययो तादापि नुस्वरदोषोऽर्थोसंगतिश्चस्यात्। तस्मात्तच्च नतेनैव भुक्ते इति भावः। स्तवेइतिशब्दः प्रकारार्थे। तेन निष्ठा
यामपि निपातनं बोध्यं। अषाल्हो अग्ने वृषभः। अषाल्हं युत्सु पृतनासु। अषाल्हाय सहमानाय इत्यादि। यत्तु हरद
त्तेन स्तत्रेषादेति रूपस्वांतमेवेति निर्णीय दीर्घात्तमपि लक्ष्यं यद्यस्ति तदा अन्येन रत्नत्वे छितः इतरदिति शाब्देन संग्राह्यमिति वर्णितं।
तत्र यदीति संदिग्धोक्तिरुक्तलक्ष्यादर्शनप्रयुक्ता। यदपि हरदत्तेनोक्तं तत्र विरूपमित्युक्तं न तत्स्वरव्यत्ययाभिप्रायेण कथं विन्नेयं। प्रमाद
एवेति तु हरदत्तः। उदात्तप्रयोगनिर्वाहार्थं बहुवचनप्राप्तिशाख्यस्कंप्रमेयमाह। अनोरिति। अस्य आचार्यस्य उच्चारणे संप्रयुक्तः सत्ह
कारतामती त्यन्वयः। स्थानिवदादेशो पिसोप्मेति भावः। ओषधेश्च। न च हृदिकारादि तिडीषागतार्थता। अंतोदात्तेतापत्ते। इष्य
ते ताद्युदात्तः। लघावंते द्वयोश्चेति फिट्सूत्रात्। कृचितु। घउतिस्वरूपग्रहणं न तरप्तमपोः। छंदसि वनशब्दस्यैव दीर्घदर्शनात्। व

तवेति। भार्यायाभ्रातास्यालः। ततःपंचमी। श्रुणोतेति तन्नन मन नथना श्चेति नवादेशाः। पितानोऽवीलं। उरुण्यातइति। उरुष्येति कंड्वा
दिषु गंतोरक्षणार्थकः। मो हिः। अतोहेरिति लुक्। डुकृः। सुत्रीति निपातस्य ग्रहणं। तस्य चेत्र कार इहैव विशेषेणार्थः। नच निपात
स्य चेति सूत्रेण गतार्थता तत्रा तइत्यनुवृत्तेरिति भावः। वस्कन्तस्कमास्त्वनुवृत्तिः। माचेदं सूत्रं। नचातिप्रसंगः। अत इत्यनुवृत्ताव
पि। अधत्ते विश्वं। अघत्वमिंद्रात मित्वेवसमनाइत्यादावतिप्रसंगाद्बाहुल्लके न समाधानस्य चेहापि तुल्यत्वादिति दिक्। स्वकेति
मध्यमपुरुषबहुवचने। त्रामिता। इहमंत्र इत्यनुवर्त्तनइति काशिका। अतएव श्रामितेयित्यर्थ इति विवरणे संगच्छते। जनिष्टाइति
इह अडागमोन। माङ्योगेप्यडागममुदाहरति मावइति। वः युष्माकं स्तेत्रे भार्याया परेषां वीर्याणि डष्टानि माभूवन्नित्यर्थः। वपेः
कर्मणि लुङ् व्यत्ययेन परस्मैपदं। एतच्च काशिकानुरोधेनोदाहृतं। अध्ययनंतु वापकरित्येव दृश्यते। माव्युरस्के उदाहरणं तुर
मन्वेषणीयं। नतिघ्रसोः। छंदसिकिं। विनेनिरेपेतिमा। घसिभसोः। हलादावजादौ च क्ङिति अनयोरुपधालोपइष्टः। अतः अची
त्याक्रष्टुं वृत्तिकारेण सूत्रे चकारः प्रक्षिप्तो न तु स सार्वः। तथाचवार्त्तिकं। हल्ग्रहणमनर्थकमन्यत्रापि दर्शनादिति। सग्धिरिति। अदेः क्तिः राम
त्। बहुलं छंदसीति घस्लादेशः। उपधालोपे कृते झलोझलीति सलोपः। धत्वं जश्त्वं। समानस्य सभावः। बद्धामिति। भसेलोट्। तातङ्॥

ब्धुः। परंनित्यमप्युपधालोपं बाधित्वा बाहुल्लकात्प्रथमं द्वित्वं ततउपधालोप इत्यादि। अजादौ। अग्निर्वनानि बप्सति। अभ्यासदी
र्घश्चेति। तुजादित्वादिति भावः। मंशोह्स्वेति। तस्यासिद्धत्वाद्यस्येति लोपो नाऽऽक्रत्सार्वेति दीर्घस्तु अंगवृत्तपरिभाषयानेति भावः। यद्वा
मकारस्मात्तस्य लोपः। ततो यस्येति लोपे कृते प्रत्ययाकारस्य श्रवणं॥ ॥इतिषष्ठः॥ ॥अहस्रमिति। बाहुल्लकादेव ऋहशोढीति गुण
नेत्येके। भाष्येतु गुणं वारयितुं दृशेरग्वक्तव्य इत्युक्तं। व्यत्ययेन प्रथमपुरुषबहुवचनस्थाने उत्तमपुरुषैकवचनं बाहुल्याशाखांतरे तु
अदृश्रन्नित्येव पठ्यत इति भावः। स्वापिर्हं। अपिशब्दात्तुल्यवपि। सचसमासेयद्यपि पूर्वेणैव सिद्धः तथाप्यसमासेऽनेनप्राप्यते। एत
दर्थमेवस्वपिशब्दः। अन्यथा छंदसीत्येव ब्रूयात्। तथाच ऽछेदो नु विरधानाः कल्पसूत्रकाराः प्रयुंजते आज्येन्नाक्षिणी अंज्येति। प्रात्तव
त्कश्चाहो। एवं विनायकं पूज्येति। सुपां सु। पंथा इति। व्यत्ययो बहुलमित्येव सिद्धमिदं। उक्तं हि तत्सुप्तिङुपग्रहेत्यादि। तस्येवत्वयं प्रपंचः।
पूर्वसवर्णइति। ईकारः। प्रमाणतआंतरतम्यात्। ततः सवर्णदीर्घः। अर्चीमसि वीरब्रह्मवाहो यादेवविप्रतासो महोनमितिबहूनां॥
अंत्ययात्तादिति अमः आत्। नविभक्तौ तुस्माः। युष्मास्वस्मभ्यमिति निशामइति। वृत्तुकाशिकायामुक्तं। यूयंवयमिति निपातइति। सोयं महान्प्रमादः।
तथा हि। नयुष्मे इति मंत्रे ऽक्रत्साश्वमेधना शोराज्ञोदानंस्तूयते। सुरथां आतिथिग्वस्वभीशंरासै। आश्वमेधेसुयशसः इत्युपक्रमात्। वाजमि

त्यन्नाम।अन्नदानेनयेसर्वेषांबंधवः।तेषांसंबोधौनहेवाजबंधवः।सुप्येयुष्मासु।अधिइतिसप्तम्यर्थानुवादी।विभक्त्यर्थेव्ययीभावसु
श्चयद्यपिनित्यसमासस्तथापिबाहुलकादिहनेतितिस्फुटएव।निंदनेच्छार्शीलोपि।निंदनेनलोपःसन्नउभावस्थबाहुलकान्नसर्वः।अ
धरयति वृद्धंनधास्यति।मवदनुसंधानमात्रेणैवनिष्पापत्वादितिभावः।निन्दितक्रयीत्कत्वाक्किस्तुनमिंदन्निगम्यतेसहितुएवश्लोकानोनाम
कृ गरणंन्यकनरांसुदइतिभावः।द्वितीयमंत्रेपिदेवताशार्थ्यनेहेइंद्राबृहस्पती।अस्मभ्यंरयिंधत्तमितिद्धातिर्दानार्थः।नत्वस्मिन्मंत्रहवेयूयंवयमि
त्यस्यकश्चिदुक्तिसंभवोस्ति।किंत्वजसः।शेइतिपक्षेयूयंवयंजसीतिकेनवारणीयं।बाहुलकादेवेतिचेन्नासोयमस्थानेसंरंभः।एतेनकाशि
कानुगामिनःप्रत्योपियथःप्रत्युक्तः।ना।अनुयेति।नाःवंकौः।षड्विंशतिरस्यवंकश्चइतिहिप्रक्रम्यइदमधितुप्रवेपगितं।ननुनुर्वातिवृत्ते
आनश्चोपसर्गइस्वंबाधितास्याशापापत्रोभावइतिक्किनाभाव्यमितिचेन्न।सत्यांइवर्णपरेनिस्तवेपवस्थाद्याप्रियतिनिर्देशाद।पिभविष्यति।सा
मान्यापेक्षज्ञापकाश्रयणात्।मरेननूनयति।व्यवस्थावदिति।बाहुनेतिप्रासइति।यत्तुकाशिकायांप्रबाहुनेतिप्रासइत्युक्तंप्रानानानुस्तने
नतत्वंसमासप्रमावहतोढ्येनेतिहिनेसमस्तां।एयक्रस्वरदर्शनात्।पुस्कारेविच्छिद्यपठ्यमानत्वाच्च।अतएवास्यानात्यतीत्येयोएतेन राम
प्रबाहुराहुत्वतीयेनिव्याचक्षाणोन्यासकारःप्रत्युक्तः।स्वमयेति।अत्राचोकारःसुपिचेतिदीर्घनित्यस्यर्थः।मिवादेशस्ये।नमुहितीयेक्रव
या
८

चनस्य।छंदसिदृष्टानुविधानादितिभावः।भाभादिकौमिल्लस्येवकारपाठस्यनिर्विवादत्वादिदंभाष्येपिपठ्यन्नसत्रस्यमलोपमात्रपरत्वोक्ते
श्चेतिभावः।स्फुणुनादिति।धिन्विकृण्व्योरचेत्युप्रत्ययः।सुनोतनेति।पित्वेसतिङित्वाभावाद्गुणः।दधातनेति।ङित्वाभावाद्धाभ्यस्तयोरातइत्या
लोपोन।जुषधमिति।काशिकायांप्रावोग्रंथेचजुषतेतिप्रामादिकमितिभावः।आज्जसे।जसेरिनिश्चवीचार्यानुरोधेननिर्देशः।श्रीग्राम।श्रीणा
मिति।वामीतिनदीत्वविकल्पाद्रूपद्वयंप्राप्तमितिप्राचांनत्विंत्वं।छंदसिदृष्टस्यनुटःसिद्धेः।अभावस्यशापादयितुमशक्यत्वात्।तस्माद्यर्थमेवेति
तत्वं।सत्ताश्चग्रामएवश्रीतिइतरेतरयोगद्वंद्वः।कौटद्विः।क्किनेप्रत्ययस्यकुरिति।नकारस्यउकारः।स्ववानिति।अवनेरस्तन्।सुष्ठुरायस्येति गो०
विग्रहः।तुधातुःसोत्रोवृध्यर्थः।ततोअसुन्।स्वंतवोवृद्धिर्यस्येतिविग्रहः।ननुशिरिति।नरनेःक्किन्।अतं।नस्यद्विर्वचनेचौतिस्वानित्वनादात।हइस्तस्य
द्वित्वं।उदरत्वं।कुद्धरः।आगंतुनाइकारेणगुणेनचनिर्देशादस्यादुकुः।अतएवस्तापकात्।धातुनिर्देशेकि[illegible]हिकारइत्यपिसुवचं।सोमे।इकुएणतिति कृ४
कुइत्यादेशस्याभावोपिबोध्यः।अष्टादशेति।सप्तमिनेःपागयक्षेलेकोनविंशतिः।चत्तोइति।चत्तछंदाद्वादापिडभौसहआहुणः।निपातेनसहएकीभ
त्यछेदस्कपरकाराणांसंप्रदायप्रसिद्धः।भूयामोइतिमंत्रेप्रयामोइतिपथा।अप्सस्याविंशस्येति।अन्येषामपीतिदीर्घः।वरुथा।छनःक्कादिस्तत्रेणेउभा
वसिद्धेनिगमएवेतिनियमार्थंनिपातनं।नदेनदाहभाषांत्वंचवरियेति।सर्वनाइति।अस्मेर्लुङ्।तिपाईउभावेअष्टकत्वादस्योदिलोपः।रुत्वविसर्गोसि

हतां शान्तु भो न गो शिति यत्वं ।लोपः शाकल्यस्येति यलोपः ।नच्छंदसि ।इह यदि ज्ञानेन यदि लभमात्रं प्रतिषिध्येत तर्हि अकृत्सार्वधातुकयोर्दीर्घः स्यात् ॥
अपवादाभावे पुनरुत्सर्गः स्थितः ।अत आह हृतेत्यादि यो नेति ।क्वचित् उक्तं न चेति न्यासव्याख्यानादिति भावः ।अत्र चलोपकमनुपदमेव वक्ष्यति ।उष्टी
यन्ती ।ति प्रकृतिमात्रे नास्यर्थं ते प्रत्ययसमानाधिकरणेति नाउष्टीयितेत्यादिवाबोध्यं ।देवसु ।न त्तु देवां जिगातीति प्रकृताहरणमगृह्य चिकृतं ।यजुषि
काठके इत्यं शाहयस्यापितत्राभावादित्याशंक्याह बहुवचनात्मभ्यवतीति ।नचेदं दृष्टमिति भावः ।काठके इति किं ।यजुर्वेदे विशारदत्वं नु रमात्रे मा भूत् अ
चसुमनयु रिदमसि ।कव्यध्वा ।कविअध्वरइत्यनेनाएषामंत्यस्य लोपः ।स्यात् क्वचित्परे क्विविषये ।मृगय्वादिगणेप्यधर्युशब्दः पठ्यते न तु अत्यंतं नेरेनो
र्यो वसुधितमिति ।वसूनां धातारं प्रदातारमित्यर्थ इति वेदभाष्यं ।ससुष्क्रिरिति ।वसंतीरूपसः ।सहरासिनः ।तैः संभूयेत्यर्थः ।विदभाष्ये तु षड्
ज्वलि ।ईरमितिः ।उषदाहोलटः शानादेशेः शपि प्राप्ते व्यत्ययेन शउत्कं ।न तु पापान्तरं वोध्यं ।नकुचेतेरिति ।अनुवृत्तस्य पर्यायेणन्यासः ।लपश्छं ।लोके
तु चरीकृष्येते कृषीवलः ।आघास्त्र्य इति ।घृउः ज्ञापः श्नुः अभ्यासस्य दीर्घः परस्मैपदं च निपात्यते ।तस्यैव यङ्लुकि रूपभावमात्रमिति वा ।तत्र पसे
मा भूदित्ये तदर्थ इदं वार्तिकं ।दूर्श्नुः आघे ऽभ्यासदीर्घः इतरत्र रुगागमनिपात्यते ॥ ॥इति सप्तमः ॥ ॥प्रस्त्रमुपोदः ।पादस्य इति किं ।प्रेस्वं रेभ्यायिषा राम
कंसौरः ।कथं तर्हि त्वद्ध्रुतं नो अध्वरं श्रुधि इमं तु ।यो अद्विमां ददनिमां इयतीति ।छंदसि सर्वे विधयो विकल्प्यंते इत्युक्तदोषः ।असत्पञ्चत इति ।असि शब्दान्त

निपातितः ।द पर्थ्यी व सनुं वद्भु कुर्युः पत्नेन किं विनिपातस्य प्राप्ति किं तु पर सेव आर पते ऋ णि लु कू २

तुष्टा ।छंदस्यपि दृश्यत इत्यङ्‌ ।नुदो असिद्धत्वात् पूर्वत्र नलोपः ।भूत पूर्वगत्या तुहान तु तस्यैव वत्प्रसंगः ।वृत्ते प्रत्यसिद्धत्वात् ।यदि तु पूर्वत्रो
नुकृ क्रियेत णत्वं न स्यात् ।तस्मात्तुडेवोचितः ।नन्वेवमवग्रहे दोषः स्यात् ।अक्ष्ण्वितिण्वत्वं नैव वक्ष्यत्यां सिं अक्ष्वेत्य कारांत मवग्रह ।तुषु चिनुसि
वेतू ।सत्यां नलक्षणे न पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्तनीयं तत्स्माद्यथा लक्षणं पदं कर्तव्यमिति महाभाष्ये स्थितं ।किं चादे
वयंतः ईश्विता समित्यादौ पदत्वं विना पि वहुलमवग्रहः क्रियते पूर्वैभिरग्निनेत्यादौ सत्यपि पदत्वे न क्रियत इति प्रागेवोक्तं ।सुपिदाव नरइति ।आ
नो मतिभिरिति ईश्वनिष्टा ।अत्रावग्रहः प्राग्वत् ।रथीतरइति ।रथशब्दान्मत्वर्थ ई निः तदंतात्तरप् ।नकारलोपे कृते इकारस्य ईकारः ।यदि तु नलोपाप
वादो नकारस्य स्थाने ईकारो विधीयते नदा तस्यासिद्धत्वात्स्वरे दीर्घो न लभ्येत ।एतेन नकारस्य ईकारादेशः सतिसवर्णदीर्घत्वमिति न्यासग्रंथः प्रयु
क्तः ।रथीतमिति ।इह तु परकाराद्व्यत्ययमवग्रहः ।अन्येषामपीति संहितायां दीर्घ इति निराशयः ।उदरेन त्रिष्वर्यस्येति ।यद्यपि तु दविदो देतिस्व
रेणैतत्सिद्धं ।न च छंदसि पास्मिकमपि ।तत्वं माभूदिति निपातनमाश्रयणं ।सर्वविकल्पानां छंदसि व्यवस्थित तया विपरीता पादनस्यासंभवात् ।अ
नुत्तमस्मेकस्त्वं विश्वासु विश्वा इडाश्मना विष्णो मिसादिमंत्रेषु नता भावस्येवं दृश्यमानत्वात् ।यदि तु कृविनत्वमपि दृश्येत तर्हि तिस्वबाहुल्ल कादिनापि
समर्थनीयत्वात् तथा विभाषामनुन्नमिति न तस्य नित्यत्वं निपातनस्य फलमित्याहुः ।अनुत्तमिति पतेन्तेत चछंदस्येव नेति व्याख्यानादिति भावः ॥

त्वरेनेरिति। ज्वरत्वरेत्यूठ्। तुर्वीत्यस्येति। राल्लोपः। स्वइत्यस्येति। उत्वे। रपरत्वं नूरणरपरइत्येव सिद्धं। कार्यकालपक्षे परिभाषाणामसिद्ध
प्रकरणेपि प्रवृत्तेः। उभयथेति व्याचष्टे। ऊठीति। नित्ये कृते आत्मेपक्षेरेफार्थमिदं। अन्तःशब्दईपदर्थे। अन्तरत्त्वमितिः। ऊठवथा महाव्याहतिग्रह
णं लक्षणप्रतिपदोक्तपरिभाषया। अनित्यत्वज्ञापनार्थं। तेनक्वापत्ति। सारोशुकुसिध्यति। मतुप। अनुबंधपरित्यागेन सकारान्तस्यवसुउ
त्वस्यमतुना सहद्वंद्वः। अल्पाचुतरस्यापिसोत्रःपरनिपातः। मरुत्वइति। अथइतिवत्वं। नसोमत्वर्थइति भत्वा। हविमोमेदिनमिति। संयोगान्तलोपो
रोःकृतेसिद्धो वक्तव्यइति वचनाद्दिर्हिवेस्तत्वंप्रसंगाद्दाह। राभ्यामिति। अनुबंधस्येति। अतएववनोरचेतिसूत्रेपिसामान्यग्रहणमुक्तं। इदंतुचि
त्यं। उक्तरीत्याह्यश्वश्रीहिकालयोरितिसूत्रेसामान्यग्रहणस्यनिर्बाधत्वेजहातेः ककारःसामान्यग्रहणनिर्वाहार्थइतिप्राचां ग्रंथेःकथंसंगच्छतइ
ति। किंच। ककारस्य फलमविवृतं। यद्यपिचड्लुकिरीघोङ्किनइतिदीर्घस्याप्रवृत्तिः। किंतुसामर्थ्यादिस्यैवाभासंभवतितथापिप्राचीनग्रंथेः
सहलस्येविसंवादोदुर्वारइतिदिक्। देवोअद्धेति। अनुपदंवक्ष्यमाणेनानोरीतिसूत्रेणानुनासिकः। नत्वत्रास्यानपसेतुअत्रानुनासिकइतिसूत्रे
णेतिविवेकः। नेहेति। एतेनमहान्हियइतिवहूवानांपागेव्याख्यातः। आङ्करेतुमहोहीरूराहतां। नढाश्चानेरअन्येपरणीयं। एवंचेति। विकल्पस्येवंचा राम
वस्थितनयाप्रकृतसूत्रेत्यागेनमहलाघवं। सूत्रारंभेतुमसयोपिङाररणीकरणीयइतिमहानक्लेशाइतिभावः। ढंद। विकल्पव्यवस्थयेवसि

सिद्देः नेसादितंस्पष्टार्थमितितत्वं। एवमुत्तरसूत्रमपिवि। दिवउत्थिव्याइति। अत्र परिःस्ववतिभावे। मूहेः। चकारोनुक्तसमुच्चयार्थइ
त्याशयेनाह। चादिति। ऋत्वीपाहमिति। ऋतिशांतस्यान्येषामपीतिदीर्घः॥ ॥इत्यच्संधिः॥ ॥साधारणप्रकृतिप्रत्ययसमासनिरू
तविषयकतयापंचभिःप्रकरणैरुदात्तादिस्वराननुस्मृत्याद्ध्यधिगुःसाधारणस्वरांस्तावदाह। अनुदात्तमिति। एकवर्जमिति। हितीयायां
चेति णमुल्। ननु तत्र परीप्सायामिति अनुवर्तनइति चेत्सत्यं। उह्याप्यस्तिपरीप्सा। तथाहि। यत्रोदात्तादिर्विधीयते तत्र नसमकालमेवशिष्ट
मनुदात्तं कर्तव्यं न विलंबितव्यमिति। एतच्च हितीयायां चेति सूत्रे हरदत्तादिभिरुक्तं। यद्वा। परीप्सायामिति नाधिकं। एतच्चात्रैवसूत्रे ह
रदत्तादिग्रंथेस्पष्टं। परिभाषेयमिति। अधिकारत्वे तु यद्यपि षाष्ठस्वरेनकश्चिद्दोषः तथापिसप्तमांतेषुदोषएव। आद्युदात्तश्चेत्येवमा
दिषुहि अस्यानुपस्थानाद्विधानानन्तरं नलभ्येत। किंच। एकवर्जमितिव्यर्थंस्यात्। नत्तत्तत्सूत्रे विधेयानांवचनसामर्थ्यादेवविधानात्प्रवृत्ते
रिति भावः। परिभाषात्वालिंगोपदर्शयन्नाह। स्वरविधाविति। एकवर्जमित्यनेन नहि अनुदात्तस्य वर्जनं युक्तं। अतः परिशेषादुदात्तस्वरितयोर्वे
स्वा॰२ वर्ज्यतेनेतिनेहिधातोर्वोपस्थानमितिभावः। नमेकमचमिति। एकग्रहणं न त्रुविधीयमानस्योपलक्षणं। तेनैवचोत्तश्चयुगपदित्यादौद्वयोर्वर्जनं
सिद्धं। वृहस्पतिरित्यत्र देवताद्वंद्वेचेतिसूत्रेणपदद्वयस्यापिप्रकृतिस्वरेविधेयेन्यतरस्यवर्जनं। वृहस्पतिशब्दोहिवनस्पत्यादित्वान्नद्युदात्तइति

तेन

तदस्तुदात्त

एकादेश

बोध्यं। गोपायतमिति। गुपू इत्यस्य धातोरित्त्वं नोदात्तः ततः आय प्रत्ययः प्रत्ययस्वरेणाद्युदात्तः। ततो धातुत्वे यकाराकारस्योदात्तः। स्व
प्रागुक्तयोरुदात्तयोः सतोः पश्चात्प्रवृत्तत्वात्सतिशिष्टः। अतो बलवान्। तस्य [illegible] शवकारेणापि
तादनुदात्तेन सह एकादेशे उदात्तेनोदात्तः। अथ सस्य लसार्वधातुकस्वरेणानुदात्तः। तस्य उदात्तादनुदात्तस्य स्वरितः। स्यादेतत्। तमिति स्वरि
तमाश्रित्य शेषनिघातोऽस्तु। न तु सन्निपातपरिभाषया निर्वाहः। तस्या अनित्यत्वेन स्वरविधावप्रवृत्तेः। अन्यथा नोदात्तादुत्तरस्य दादन्य
तरस्यां ह्रस्वनुड्भ्यां मतुबित्यादिभिरपि स्वरिते कृते शेषनिघातो न प्रवर्तेतेति बहु व्याकुली स्यात्। किं च अग्ने मृड महाँ असि त्वोदोस्य
प्रसयादीनां निघातः केन वार्यते। न हि तत्र सन्निपातपरिभाषायाः प्राप्तिसंभवोऽस्ति। अपि संदर्वोऽएहवक्षनीत्यत्र एकादेश उदात्तेनोदात्तः च
इति कृते हकाराकारो निहन्येत एवमुदात्तस्वरितयोर्यण इति स्वरिते कृते न्यग्निं जातवेदसमित्यत्राग्निशब्दस्येकारो हन्येत नेति चेत्। अत्रो
च्यते। यथोद्देशपक्षाश्रयणेनेयं परिभाषा त्रिपाद्यां न प्रवर्तते न त्वयं नास्ति तं यतो नावद्वितिसूत्रं चेह ज्ञापकं। परिभाषा नेरालितु कालपक्षा कार्य ३
श्रयणे त्ववर्तत एव। अतो न कश्चित्प्रागुक्तदोषः। सतिशिष्टेति। एतच्च न्यायसिद्धं। तथा हि। यथोद्देशपक्षमवलंब्य प्रवृत्ताया अप्यस्या उदात्त राम
स्वरितविधिभिः सहैकवाक्यैकवाक्यतास्त्येव। ततश्च उत्सर्गस्यापवादस्य वा यस्यैव यत्र चरमा प्राप्तिस्तदेकवाक्यतापन्नयानया लक्ष्यं

व संस्थाप्यते। अत एवौपगवत्वमित्यत्राणप्रत्ययेत्वप्रत्ययेन आवृत्ताद्युदात्तश्चेति प्रवर्त्तमानं स्वस्यैव प्रथमप्रवृत्तिं बाधेन हिनी
य प्रवृत्ताल्लक्ष्यं परिनिष्ठापयतीति दिक्। अन्यच्चेति। अत्र च ज्ञापकं तासेः परस्य लसार्वधातुकस्य निघातविधानं। अन्यथा ले
कारमात्रापेक्षतादंतरंगत्वेन च तिवादिषु कृतेषु क्रियमाणस्य तासेः स्वरस्य सतिशिष्टत्वाच्छेषनिघातेनैव सिद्धेरनर्थकं तत्स्यात्
चूर्णितेति। अंतोदात्तं पदं। अत्र लसार्वधातुकनिघातो नास्ति। अदुपदेशो नित्यपरकरणात्। श्ना प्रत्ययस्यादंतत्वाभावात्। तिङः किङ
तिनिघातेऽस्तु न भवति यद्वृत्तान्नित्यमिति निषेधात्। स हि व्यवहितेऽपि प्रवर्तते इति वक्ष्यते इह च सहोनाय स्मरो दसीइति द्वर्वचेरणे यद्
त्तमस्तीति दिक्। देवीमिति। पचादिषु देवट्इति टित्वकरणात् ङीप्। नोदात्तनिवृत्तीति। कृदुत्तरपदप्रकृतिस्वरेणोदात्तस्यव
त्वकारस्याच्च इति लोपे सति अनुदात्तस्य चेति स्वरेणोदात्तः प्राप्तस्तस्यायमपवादः इत्यर्थः। इमम्म इति। मेशब्दात्परतमाश्रित्य गंगे प्रभृ
तीनां त्रयाणामनुदात्तः। स च पदपाठस्य एव। संहितायां तु स्वरिताः संहितायामिति निवर्त्यैपरेनामधेयाएकश्रुतिः प्रवर्त्तते। नामंत्रि। सा भाषाप्रक्रया २
मान्यवचनं पदं व्यावर्त्य विशेष्यमिति विशेष्यसमर्पकमित्यर्थः। अग्नेत्रातेरिति। अग्निरिह विशेष्यः त्रातृकर्तृत्वं तु विशेषणं। अग्नेश्वो
तः स्वहस्तनेतिमंत्रेऽतु शुचिश्रोतनि विशेष्यते न विवक्षितं। अतो ऽग्नेरुत्तरस्य अविद्यमानवत्त्वाभावात्। आनरित्यस्य निघातः। एवं तत्र उत्तरेषा

मिति बोध्यं। देवीः षड्भिरिति। अत्र देवीरित्यामन्त्रितेन। विद्यमानवत्त्वेन षष्ठ्यास्य निघातः। अव्ययीभावस्येति। एतच्च अव्ययीभा
वश्चेति संज्ञासूत्रे भाष्ये स्पष्टं। अभ्यमीति। उपसर्गाश्चाभिवर्जमिति फिट्सूत्रेण अभिशब्दोऽन्तोदात्तः। तस्य नित्यत्वीसमासयोरिति हित्वं। अनुदा
त्ते चेति परस्यानुदात्तत्वं। यणि कृते उदात्तयणः परत्वात् स्वरितः। खलप्वाशा। खलपूशब्दः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः। ततः समस्य च वचन
स्य उदात्तयणो हल्पूर्वादिति प्राप्तस्योदात्तस्य नोङ्धात्वोरिति निषेधः। ततोनेन स्वरितः। तस्य यणि ततः परस्य आशाशब्दाकारस्या
नेनैव स्वरितः। आशाशब्दोऽयं तोदात्तः। आशाया अदिगाख्या चेदिति फिट्सूत्रात्। अस्येति। आशाशब्द प्रथमाकारस्यानिकस्यैव
र्थः। शेषेति। शाशब्दस्य निघातो नेत्यर्थः। स्यादेतत्। यणादेशोपनिस्वरितस्यासिद्धत्वात् स्थानिन्येव यण्प्रवृत्तेः यथा। ओजदित्यत्र द
न शब्दे हित्वं प्रवर्त्तते न तु दशब्दे। न च स्वरितयणः परस्येत्याश्रयणात् सिद्धत्वं शक्यं। अभिप्रसंगात्। उदात्तादनुदात्तस्य स्वरितत्वस्यानेन
रितस्या३ यत्र किंयेतेन त्रापि स्वरसिद्धत्वेनस्यात्। न चेष्टापत्तिः लक्ष्यविरोधात्। प्रत्यग्निरुषसामग्रमख्यत् इत्यादौ स्वरितादर्शनात्। न च नोदा
त्तस्वरितोदयमिति निषेधः शंक्यः। अनन्तरस्येति न्यायेनोदात्तादनुदात्तस्येति यत्प्राप्तिः तन्मात्रस्य निषेधात्। अन्यथा खलप्वाशा॥ राम
न्य॰ग्निं पाह्य॰ स्यात्। इत्यादावपि निषेधापत्तेः। तस्मादिह समाधानान्तरमेव वाच्यमिति चेत्। अत्राहुर्भाष्यकाराः। योगविभागः कर्त्तव्यः।

६२

१३

उदात्तयणः। परस्यानुदात्तस्य स्वरितः स्यात्। ततः स्वरितयणः। इह पूर्वमनुवर्त्तते। उदात्तयण इत्येवं पोभिनिर्दिष्टिः स्वरितयणोऽस्ते णः पर
स्येत्यर्थः। एवं चास्यैवाश्रयासिद्धत्वं नान्यस्य। अथ द्वा स्वरितग्रहणं न करिष्ये। स्वलप्वाशेत्यादावपि उदात्तयणः परत्वादेव सिद्धत्वा
त्। न च स्वरितग्रहणं व्यवधानं वाक्यं। स्वरविधौ व्यंजनस्याविद्यमानवत्त्वादिति। यत्तु काशिकायामुक्तं व्यंजनस्याविद्यमानवत्त्वेन
त्वचः। इह तु स्थानिवद्भावादजेवान च स्वरविधौ नन्निषेधः। स्वरदीर्घयलोपेषु लोपाजादेश एवेति सिद्धान्तात्। तस्मात् स्वरितग्रहणं न
करिष्यत इत्यसंगतं। योगविभागपक्षः परमवशिष्यते। सोपि न। उदात्तानुदात्तस्येति यः स्वरितः तत्स्थानिकाद्यणः परस्यापि स्वरितत्वद
स्मा१ र्शनात्। पृथ्वन्ते हि तैत्तिरीयाः याते विश्वाः समिधः सन्त्वग्न इति। तद्भाष्यस्वरूपस्य हृदयमपि न संगच्छत इति सोयं वृत्तिकृतो महाननुव्यामोहः। भा
९ ष्यात्ते पक्षे ह यस्याः क्षोदक्षमत्वात्। तथा हि योगविभागपक्षे सन्त्यग्न इत्यत्र नानुपपत्तिः सकाराकारमाश्रित्य उदात्तादनुदात्तस्येत्येवाभि
शाद्याकारस्य स्वरितसिद्धेः। न च स्थानिवद्भावाद्व्यवधानं। पूर्वस्माद्धि धाविनि पंचमी समासस्य प्रत्याख्यानात् स्त्रीकोरपि शा निष्ठामासे
टी निर्ज्ञापकेना नित्यत्वात्। सार्वत्रिकत्वाभ्युपगमेपि पूर्वत्रासिद्धीयेनदभावात्। अत एव प्रत्यग्निरित्यादौ स्वरितत्वं न प्रवर्त्तते। नोदात्तस्व
रितेत्यादिना निषेधात्। यदि हि सन्त्यग्न इत्यत्र प्रकृतसूत्रं प्रवर्त्तेत न हि निरपवादत्वात् पोऽयस्मान्नित्यत्रैव प्रत्यग्निरित्यत्रापि तस्य प्रवृत्तिः

कोवा रयेन॥ एवं स्वरितग्रहणप्रत्याख्यानपक्षेऽपि साधुरेव पूर्वत्रासिद्धीयेन स्थानिवद्भिस्य जागरूकत्वेन वृत्तिकारोक्तदोषस्य
निरवकाशत्वादिति भाव। त्वयेमुत्सा यत्सुधीभिराकलनीयं॥ एतेन रध्याशायनीसाहेति स्वरितयणः स्वरितत्वेनुदाहरणं वदन्नु यथा
श्रुतं वृत्तिग्रंथं वाचत्रेउयत्वस्वरमंजरीकारः प्रत्युक्तः। लोपाजादेश एव स्थानिवदिति नियमो हि स्वरविधौ नेति प्रतिपदोक्तस्यैव निषेधस्य
न तु पूर्वत्रासिद्धीयत्वप्रयुक्तस्यापि। एकादेश उदात्तेनोदात्तः। उदात्तयोरेव स्थानिवत्त्वे ओं नरनम्यादेव सिद्धं। अन्यतरस्यानुदात्तत्वे स्वरि
तत्वं सिद्धं तत्स्थं गोनर्यादिति न्यायेन ओं नरम्या स्वरितेनाम्रेविधिरयमिति धनयत्नुदाहरणद्वयमाह। वोश्वा इत्यादि। अत्र वउत्य
नुदात्तौ। बहुवचनस्य वसुनसादिस्तत्रानुदात्तं सर्वमपादादावित्यधिकारात्। अश्वशब्द आद्युदात्तः। अशेः क्वन्नित्यात्तादित्वात्। वाके
ति। किमो तो निस्वरितो अवरशब्दः स्वांगशिटमित्याद्युदात्तः। स्यादेतत्। काव रमित्युदाहरणमयुक्तं। एकादेश उदात्तेनोदात्त इति सूत्रे
पूर्वसूत्रादनुदात्तस्येत्यस्यानुवृत्तेः काशिकायामुक्तत्वात्। नस्यादिति इति सूत्रे स्वरितो वोदात्तार्थं वेत्तिवार्त्तिकस्य तत्र भाष्ये कैयटादीनां चैत
थैव स्वरसादिति चेत्सत्यं। इहस्व वेप्राचां ग्रंथाः अस्तु व्यभात्र परत्या कथंचिन्नेयाः। बहूनां नामुदात्तप्रस्य निविंगादत्वानातेत्तरीयाणा राम
मपि। याज्ये वेनेमेन पाप्ना यजतीत्यत्राङ् प्रश्लेषेण द्वितीयाक्षरस्योदात्तत्वात्। अत एव बह्वृचप्रातिशाख्ये उदात्तवत्वे कभावच उदात्तं संध्यमे

क्षरं। अनुदात्तोदये पुनः स्वरितं स्वरितोपधे इति श्लोके पूर्वार्द्धे अनुदात्तग्रहणेन कृतं किं तत्रैतरेवेव। सैतस्य पूर्वान्वियमत्रमेवाशयि
त्वं पुनः पुशब्दः प्रयुक्तः। शौनकीये स्वरशब्दके पि एकादिष्टमुदात्तेन तत्तमेवनयेत्स्वरमित्युक्तमिति दिक्॥ इकारयोरिति। ह्रस्व
योरेवेत्यर्थः। अस्य श्लोक इत्यत्र तु ईयन इति दीर्घस्य प्रवेशान्न स्वरितः। इयं च बह्वृचानां व्यवस्थोक्ता। अन्येषामपि तु दीयप्राति
शाख्यानुसारेण बोध्या। नोदात्त। उदयशब्दः परशब्देन समानार्थः प्रातिशाख्येषु प्रसिद्धः॥ लाघवार्थं परशब्दे प्रयोक्तव्ये मंगलार्थ
मुदयशब्दः प्रयुक्तः। तथा च भाष्यं मंगलादीनि मंगलमध्यानि मंगलांतानि च शास्त्राणि प्रथंत इत्यादि। एवं च पूर्वद्विरित्यादौ शिवश
मितिमध्ये स्वरितोदयमिति चांते पाणिनीये मंगलं कृतं। यद्यपि तन्त्रद्वयं स्वत्का गार्ग्यादीनां मते वेति नियमो व्याख्यातुं शक्यते। तथापि गा
र्ग्यादीनामुदात्तादिपरमेवेति विपरीतनियमं चोकां वारयितुं तन्त्रद्वयोक्तेर्भाविः॥ आगतभोइनि। अत्र माणवकशब्दस्य टेः प्लुतो वेकालि
कत्वात्तत्कृतः। पस्ते सोऽपि बोध्यः। प्लुत उदात्तः। प्लुत उदात्त इत्यधिकारात्। एकश्रुतिदूरात्सम्बुद्धावित्यत्र भेदेन वाक्ये संबुद्धितान्यां दूरात्त
बोधनं द्योत्यते। विभाषा। अत्र तंत्रेण वृत्त्या वा छंदसीति तन्त्र प्रश्लिष्य भाषायामपि ऐच्छिको विकल्पो बोध्यः। तथा च दंडिनायनादिसूत्रे भा
ष्यं एकश्रुति हि स्वरसर्वनामेत्यादि। अत एवाभियुक्तानां विकृद्धस्वरेकतनत्रुपुरुषबहुव्रीह्योद्याश्रयणेन श्लिष्टकाव्यादिनिर्माणं संगच्छते।

